# Devarajamangalam

# देवराजमङ्गलम्

## Document Information

Text title : Devarajamangalam

File name : devarAjamangalam.itx

Category : vishhnu, mangala

Location : doc_vishhnu

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# देवराजमङ्गलम्

श्रीवरवरमुनिभिरनुगृहीतं
श्रीरस्तु ।
श्रीमते हयग्रीवाय नमः ।
श्रीमते रामानुजाय नमः ॥

यश्चक्रे देवराजस्य मङ्गलाशासनं मुदा ।
तं वन्दे रम्यजामातृमुनिं विशदवाग्वरम् ॥

मङ्गलं वेधसो वेदिमेदिनीगृहमेधिने ।
वरदाय दयाधाम्ने धीरोदाराय मङ्गलम् ॥ १॥

वाजिमेधे वपाहोमे धातुरुत्तरवेदितः ।
उदिताय हुतादग्नेः उदाराङ्गाय मङ्गलम् ॥ २॥

यजमानं विधिं वीक्ष्य स्मयमानमुखश्रिये ।
दयामानदृशे तस्मै देवराजाय मङ्गलम् ॥ ३॥

वारिदश्यामवपुषे विराजत्पीतवाससे ।
वारणाचलवासाय वारिजाक्षाय मङ्गलम् ॥ ४॥

अद्यापि सर्वभूतानां अभीष्टफलदायिने ।
प्रणतार्तिहरायास्तु प्रभवे मम मङ्गलम् ॥ ५॥

दिव्यावयवसौन्दर्यदिव्याभरणहेतये ।
दन्तावलगिरीशाय देवराजाय मङ्गलम् ॥ ६॥

पुरुषाय पुराणाय पुण्यकोटिनिवासिने ।
पुष्पितोदारकल्पद्रुकमनीयाय मङ्गलम् ॥ ७॥

काञ्चनाचलशृङ्गाग्रकालमेघानुसारिणे ।
सुपर्णांसावतंसाय सुरराजाय मङ्गलम् ॥ ८॥

भोगापवर्गयोरेकं वाञ्छद्भ्यो ददते द्वयम् ।
श्रीमद्वरदराजाय महोदाराय मङ्गलम् ॥ ९॥

मतङ्गजाद्रितुङ्गाग्रशृङ्गशृङ्गारवर्ष्मणे ।
महाकृपाय मद्रक्षादीक्षितायास्तु मङ्गलम् ॥ १०॥

श्रीकाञ्चीपूर्णमिश्रेण प्रीत्या सर्वाभिभाषिणे ।
अतीतार्चाव्यवस्थाय हस्त्यद्रीशाय मङ्गलम् ॥

अस्तु श्रीस्तनकस्तूरीवासनावासितोरसे ।
श्रीहस्तिगिरिनाथाय देवराजाय मङ्गलम् ॥ १२॥

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १३॥

इति देवराजमङ्गलं समाप्तम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Devarajamangalam*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*